# Shri GopAla SahasranAma Stotra

# શ્રીગોપાલસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : gopAla sahasranAma stotra

File name : gopaalasahasra.itx

Category : sahasranAma, vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Author : Traditional

Proofread by : Proofread by PSA Easwaran

Latest update : NOvember 20, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીગોપાલસહસ્રનામસ્તોત્રમ્

પાર્વત્યુવાચ-
કૈલાસશિખરે રમ્યે ગૌરી પૃચ્છતિ શઙ્કરમ્ ।
બ્રહ્માણ્ડાખિલનાથસ્ત્વં સૃષ્ટિસંહારકારકઃ ॥ ૧॥

ત્વમેવ પૂજ્યસે લોકૈર્બ્રહ્મવિષ્ણુસુરાદિભિઃ ।
નિત્યં પઠસિ દેવેશ કસ્ય સ્તોત્રં મહેશ્વર ॥ ૨॥

આશ્ચર્યમિદમાખ્યાનં જાયતે મયિ શઙ્કર ।
તત્પ્રાણેશ મહાપ્રાજ્ઞ સંશયં છિન્ધિ મે પ્રભો ॥ ૩॥

શ્રીમહાદેવ ઉવાચ-
ધન્યાસિ કૃતપુણ્યાસિ પાર્વતિ પ્રાણવલ્લભે ।
રહસ્યાતિરહસ્યં ચ યત્પૃચ્છસિ વરાનને ॥ ૪॥

સ્ત્રીસ્વભાવાન્મહાદેવિ પુનસ્ત્વં પરિપૃચ્છસિ ।
ગોપનીયં ગોપનીયં ગોપનીયં પ્રયત્નતઃ ॥ ૫॥

દત્તે ચ સિદ્ધિહાનિઃ સ્યાત્તસ્માદ્યત્નેન ગોપયેત્ ।
ઇદં રહસ્યં પરમં પુરુષાર્થપ્રદાયકમ્ ॥ ૬॥

ધનરત્નૌઘમાણિક્યં તુરઙ્ગં ચ ગજાદિકમ્ ।
દદાતિ સ્મરણાદેવ મહામોક્ષપ્રદાયકમ્ ॥ ૭॥

તત્તેઽહં સમ્પ્રવક્ષ્યામિ શૃણુષ્વાવહિતા પ્રિયે ।
યોઽસૌ નિરઞ્જનો દેવઃ ચિત્સ્વરૂપી જનાર્દનઃ ॥ ૮॥

સંસારસાગરોત્તારકારણાય નૃણામ્ સદા ।
શ્રીરઙ્ગાદિકરૂપેણ ત્રૈલોક્યં વ્યાપ્ય તિષ્ઠતિ ॥ ૯॥

તતો લોકા મહામૂઢા વિષ્ણુભક્તિવિવર્જિતાઃ ।
નિશ્ચયં નાધિગચ્છન્તિ પુનર્નારાયણો હરિઃ ॥ ૧૦॥

નિરઞ્જનો નિરાકારો ભક્તાનાં પ્રીતિકામદઃ ।
વૃન્દાવનવિહારાય ગોપાલં રૂપમુદ્વહન્ ॥ ૧૧॥

મુરલીવાદનાધારી રાધાયૈ પ્રીતિમાવહન્ ।
અંશાંશેભ્યઃ સમુન્મીલ્ય પૂર્ણરૂપકલાયુતઃ ॥ ૧૨॥

શ્રીકૃષ્ણચન્દ્રો ભગવાન્ નન્દગોપવરોદ્યતઃ ।
ધરણીરૂપિણીમાતૃયશોદાનન્દદાયકઃ ॥ ૧૩॥

દ્વાભ્યાં પ્રયાચિતો નાથો દેવક્યાં વસુદેવતઃ ।
બ્રહ્મણાઽભ્યર્થિતો દેવો દેવૈરપિ સુરેશ્વરિ ॥ ૧૪॥

જાતોઽવન્યાં મુકુન્દોઽપિ મુરલોવેદરેચિકા ।
તયા સાર્દ્ધં વચઃ કૃત્વા તતો જાતો મહીતલે ॥ ૧૫॥

સંસારસારસર્વસ્વં શ્યામલં મહદુજ્જ્વલમ્ ।
એતજ્જ્યોતિરહં વેદ્યં ચિન્તયામિ સનાતનમ્ ॥ ૧૬॥

ગૌરતેજો વિના યસ્તુ શ્યામતેજસ્સમર્ચયેત્ ।
જપેદ્વા ધ્યાયતે વાપિ સ ભવેત્ પાતકી શિવે ॥ ૧૭॥

સ બ્રહ્મહા સુરાપી ચ સ્વર્ણસ્તેયી ચ પઞ્ચમઃ ।
એતૈર્દોષૈર્વિલિપ્યેત તેજોભેદાન્મહીશ્વરિ ॥ ૧૮॥

તસ્માજ્જ્યોતિરભૂદ્ દ્વેધા રાધામાધવરૂપકમ્ ।
તસ્માદિદં મહાદેવિ ગોપાલેનૈવ ભાષિતમ્ ॥ ૧૯॥

દુર્વાસસો મુનેર્મોહે કાર્તિક્યાં રાસમણ્ડલે ।
તતઃ પૃષ્ટવતી રાધા સન્દેહભેદમાત્મનઃ ॥ ૨૦॥

નિરઞ્જનાત્સમુત્પન્નં મયાઽધીતં જગન્મયિ ।
શ્રીકૃષ્ણેન તતઃ પ્રોક્તં રાધાયૈ નારદાય ચ ॥ ૨૧॥

તતો નારદતસ્સર્વે વિરલા વૈષ્ણવા જનાઃ ।
કલૌ જાનન્તિ દેવેશિ ગોપનીયં પ્રયત્નતઃ ॥ ૨૨॥

શઠાય કૃપણાયાથ દામ્ભિકાય સુરેશ્વરિ ।
બ્રહ્મહત્યામવાપ્નોતિ તસ્માદ્યત્નેન ગોપયેત્ ॥ ૨૩॥

પાઠ કરને કી વિધિ

ૐ અસ્ય શ્રીગોપાલસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય શ્રીનારદ ઋષિઃ ।

અનુષ્ટુપ્ છન્દઃ । શ્રીગોપાલો દેવતા । કામો બીજમ્ । માયા શક્તિઃ ।
ચન્દ્રઃ કીલકમ્ શ્રીકૃષ્ણચન્દ્ર ભક્તિરૂપફલપ્રાપ્તયે
શ્રીગોપાલસહસ્રનામસ્તોત્રજપે વિનિયોગઃ ।
યા ઇસતરહ કરેં પાઠ
ૐ ઐં ક્લીં બીજમ્ । શ્રીં હ્રીં શક્તિઃ ।
શ્રીવૃન્દાવનનિવાસઃ કીલકમ્ ।
શ્રીરાધાપ્રિયપરબ્રહ્મેતિ મન્ત્રઃ ।
ધર્માદિચતુર્વિધપુરુષાર્થસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

અથ કરાદિન્યાસઃ
ૐ ક્લાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ ક્લીં તર્જનીભ્યાં નમઃ ॥

ૐ ક્લૂં મધ્યમાભ્યાં નમઃ ॥

ૐ ક્લૈં અનામિકાભ્યાં નમઃ ॥

ૐ ક્લૌં કનિષ્ઠિકાભ્યાં નમઃ ॥

ૐ ક્લઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અથ હૃદયાદિન્યાસઃ
ૐ ક્લાં હૃદયાય નમઃ ।
ૐ ક્લીં શિરસે સ્વાહા ॥

ૐ ક્લૂં શિખાયૈ વષટ્ ॥

ૐ ક્લૈં કવચાય હું ॥

ૐ ક્લૌં નેત્રત્રયાય વૌષટ્ ॥

ૐ ક્લઃ અસ્ત્રાય ફટ્ ॥

અથ ધ્યાનમ્

કસ્તૂરીતિલકં લલાટપટલે વક્ષઃસ્થલે કૌસ્તુભં
નાસાગ્રેવરમૌક્તિકં કરતલે વેણું કરે કઙ્કણમ્ ॥

સર્વાઙ્ગે હરિચન્દનં સુલલિતં કણ્ઠે ચ મુક્તાવલિમ્
ગોપસ્ત્રીપરિવેષ્ટિતો વિજયતે ગોપાલચૂડ઼ામણિઃ ॥ ૧॥

ફુલ્લેન્દીવરકાન્તિમિન્દુવદનં બર્હાવતંસપ્રિયં
શ્રીવત્સાઙ્કમુદારકૌસ્તુભધરં પીતામ્બરં સુન્દરમ્ ॥

ગોપીનાં નયનોત્પલાર્ચિતતનું ગોગોપસઙ્ઘાવૃતં
ગોવિન્દં કલવેણુવાદનપરં દિવ્યાઙ્ગભૂષં ભજે ॥ ૨॥

સહસ્રનામ સ્તોત્ર આરમ્ભ-

ૐ ક્લીં દેવઃ કામદેવઃ કામબીજશિરોમણિઃ ।
શ્રીગોપાલો મહીપાલો સર્વવેદાન્તપારગઃ ॥ ૧॥ var સર્વવેદાઙ્ગપારગઃ
કૃષ્ણઃ કમલપત્રાક્ષઃ પુણ્ડરીકઃ સનાતનઃ । var ધરણીપાલકોધન્યઃ
ગોપતિર્ભૂપતિઃ શાસ્તા પ્રહર્તા વિશ્વતોમુખઃ ॥ ૨॥

આદિકર્તા મહાકર્તા મહાકાલઃ પ્રતાપવાન્ ।
જગજ્જીવો જગદ્ધાતા જગદ્ભર્તા જગદ્વસુઃ ॥ ૩॥

મત્સ્યો ભીમઃ કુહૂભર્તા હર્તા વારાહમૂર્તિમાન્ ।
નારાયણો હૃષીકેશો ગોવિન્દો ગરુડધ્વજઃ ॥ ૪॥

ગોકુલેન્દ્રો મહીચન્દ્રઃ શર્વરીપ્રિયકારકઃ ।
કમલામુખલોલાક્ષઃ પુણ્ડરીકઃ શુભાવહઃ ॥ ૫॥

દુર્વાસાઃ કપિલો ભૌમઃ સિન્ધુસાગરસઙ્ગમઃ ।
ગોવિન્દો ગોપતિર્ગોપઃ કાલિન્દીપ્રેમપૂરકઃ ॥ ૬॥

ગોપસ્વામી ગોકુલેન્દ્રો ગોવર્ધનવરપ્રદઃ ।
નન્દાદિગોકુલત્રાતા દાતા દારિદ્ર્યભઞ્જનઃ ॥ ૭॥

સર્વમઙ્ગલદાતા ચ સર્વકામપ્રદાયકઃ ।
આદિકર્તા મહીભર્તા સર્વસાગરસિન્ધુજઃ ॥ ૮॥

ગજગામી ગજોદ્ધારી કામી કામકલાનિધિઃ ।
કલઙ્કરહિતશ્ચન્દ્રો બિમ્બાસ્યો બિમ્બસત્તમઃ ॥ ૯॥

માલાકારઃ કૃપાકારઃ કોકિલસ્વરભૂષણઃ ।
રામો નીલામ્બરો દેવો હલી દુર્દમમર્દનઃ ॥ ૧૦॥

સહસ્રાક્ષપુરીભેત્તા મહામારીવિનાશનઃ ।
શિવઃ શિવતમો ભેત્તા બલારાતિપ્રપૂજકઃ ॥ ૧૧॥

કુમારીવરદાયી ચ વરેણ્યો મીનકેતનઃ ।

નરો નારાયણો ધીરો રાધાપતિરુદારધીઃ ॥ ૧૨॥

શ્રીપતિઃ શ્રીનિધિઃ શ્રીમાન્ માપતિઃ પ્રતિરાજહા ।
વૃન્દાપતિઃ કુલગ્રામી ધામી બ્રહ્મ સનાતનઃ ॥ ૧૩॥

રેવતીરમણો રામઃ પ્રિયશ્ચઞ્ચલલોચનઃ ।
રામાયણશરીરોઽયં રામો રામઃ શ્રિયઃપતિઃ ॥ ૧૪॥

શર્વરઃ શર્વરી શર્વઃ સર્વત્ર શુભદાયકઃ ।
રાધારાધયિતારાધી રાધાચિત્તપ્રમોદકઃ ॥ ૧૫॥

રાધારતિસુખોપેતઃ રાધામોહનતત્પરઃ ।
રાધાવશીકરો રાધાહૃદયામ્ભોજષટ્પદઃ ॥ ૧૬॥

રાધાલિઙ્ગનસમ્મોહઃ રાધાનર્તનકૌતુકઃ ।
રાધાસઞ્જાતસમ્પ્રીતો રાધાકામ્યફલપ્રદઃ ॥ ૧૭॥

વૃન્દાપતિઃ કોશનિધિઃ કોકશોકવિનાશનઃ ।
ચન્દ્રાપતિઃ ચન્દ્રપતિઃ ચણ્ડકોદણ્ડભઞ્જનઃ ॥ ૧૮॥

રામો દાશરથી રામઃ ભૃગુવંશસમુદ્ભવઃ ।
આત્મારામો જિતક્રોધો મોહો મોહાન્ધભઞ્જનઃ ॥ ૧૯॥

વૃષભાનુભવો ભાવઃ કાશ્યપિઃ કરુણાનિધિઃ ।
કોલાહલો હલી હાલી હેલી હલધરપ્રિયઃ ॥ ૨૦॥

રાધામુખાબ્જમાર્તાણ્ડઃ ભાસ્કરો રવિજા વિધુઃ ।
વિધિર્વિધાતા વરુણો વારુણો વારુણીપ્રિયઃ ॥ ૨૧॥

રોહિણીહૃદયાનન્દો વસુદેવાત્મજો બલી ।
નીલામ્બરો રૌહિણેયો જરાસન્ધવધોઽમલઃ ॥ ૨૨॥

નાગો નવામ્ભો વિરુદો વીરહા વરદો બલી ।
ગોપથો વિજયી વિદ્વાન્ શિપિવિષ્ટઃ સનાતનઃ ॥ ૨૩॥

પરશુરામવચોગ્રાહી વરગ્રાહી શૃગાલહા ।
દમઘોષોપદેષ્ટા ચ રથગ્રાહી સુદર્શનઃ ॥ ૨૪॥

વીરપત્નીયશસ્ત્રાતા જરાવ્યાધિવિઘાતકઃ ।
દ્વારકાવાસતત્ત્વજ્ઞઃ હુતાશનવરપ્રદઃ ॥ ૨૫॥

યમુનાવેગસંહારી નીલામ્બરધરઃ પ્રભુઃ ।
વિભુઃ શરાસનો ધન્વી ગણેશો ગણનાયકઃ ॥ ૨૬॥

લક્ષ્મણો લક્ષણો લક્ષ્યો રક્ષોવંશવિનાશનઃ ।
વામનો વામનીભૂતોઽવામનો વામનારુહઃ ॥ ૨૭॥

યશોદાનન્દનઃ કર્ત્તા યમલાર્જુનમુક્તિદઃ ।
ઉલૂખલી મહામાની દામબદ્ધાહ્વયી શમી ॥ ૨૮॥

ભક્તાનુકારી ભગવાન્ કેશવો બલધારકઃ ।
કેશિહા મધુહા મોહી વૃષાસુરવિઘાતકઃ ॥ ૨૯॥

અઘાસુરવિનાશી ચ પૂતનામોક્ષદાયકઃ ।
કુબ્જાવિનોદી ભગવાન્ કંસમૃત્યુર્મહામખી ॥ ૩૦॥

અશ્વમેધો વાજપેયો ગોમેધો નરમેધવાન્ ।
કન્દર્પકોટિલાવણ્યશ્ચન્દ્રકોટિસુશીતલઃ ॥ ૩૧॥

રવિકોટિપ્રતીકાશો વાયુકોટિમહાબલઃ ।
બ્રહ્મા બ્રહ્માણ્ડકર્તા ચ કમલાવાઞ્છિતપ્રદઃ ॥ ૩૨॥

કમલા કમલાક્ષશ્ચ કમલામુખલોલુપઃ ।
કમલાવ્રતધારી ચ કમલાભઃ પુરન્દરઃ ॥ ૩૩॥

સૌભાગ્યાધિકચિત્તોઽયં મહામાયી મદોત્કટઃ ।
તારકારિઃ સુરત્રાતા મારીચક્ષોભકારકઃ ॥ ૩૪॥

વિશ્વામિત્રપ્રિયો દાન્તો રામો રાજીવલોચનઃ ।
લઙ્કાધિપકુલધ્વંસી વિભીષણવરપ્રદઃ ॥ ૩૫॥

સીતાનન્દકરો રામો વીરો વારિધિબન્ધનઃ ।
ખરદૂષણસંહારી સાકેતપુરવાસવાન્ ॥ ૩૬॥

ચન્દ્રાવલીપતિઃ કૂલઃ કેશિકંસવધોઽમલઃ ।
માધવો મધુહા માધ્વી માધ્વીકો માધવો વિધુઃ ॥ ૩૭॥

મુઞ્જાટવીગાહમાનઃ ધેનુકારિર્ધરાત્મજઃ ।
વંશીવટવિહારી ચ ગોવર્ધનવનાશ્રયઃ ॥ ૩૮॥

તથા તાલવનોદ્દેશી ભાણ્ડીરવનશઙ્ખહા ।
તૃણાવર્તકૃપાકારી વૃષભાનુસુતાપતિઃ ॥ ૩૯॥

રાધાપ્રાણસમો રાધાવદનાબ્જમધુવ્રતઃ ।
ગોપીરઞ્જનદૈવજ્ઞઃ લીલાકમલપૂજિતઃ ॥ ૪૦॥

ક્રીડાકમલસન્દોહઃ ગોપિકાપ્રીતિરઞ્જનઃ ।
રઞ્જકો રઞ્જનો રઙ્ગો રઙ્ગી રઙ્ગમહીરુહઃ ॥ ૪૧॥

કામઃ કામારિભક્તોઽયં પુરાણપુરુષઃ કવિઃ ।
નારદો દેવલો ભીમો બાલો બાલમુખામ્બુજઃ ॥ ૪૨॥

અમ્બુજો બ્રહ્મસાક્ષી ચ યોગી દત્તવરો મુનિઃ ।
ઋષભઃ પર્વતો ગ્રામો નદીપવનવલ્લભઃ ॥ ૪૩॥

પદ્મનાભઃ સુરજ્યેષ્ઠી બ્રહ્મા રુદ્રોઽહિભૂષિતઃ ।
ગણાનાં ત્રાણકર્તા ચ ગણેશો ગ્રહિલો ગ્રહી ॥ ૪૪॥

ગણાશ્રયો ગણાધ્યક્ષઃ ક્રોડીકૃતજગત્ત્રયઃ ।
યાદવેન્દ્રો દ્વારકેન્દ્રો મથુરાવલ્લભો ધુરી ॥ ૪૫॥

ભ્રમરઃ કુન્તલી કુન્તીસુતરક્ષો મહામખી ।
યમુનાવરદાતા ચ કાશ્યપસ્ય વરપ્રદઃ ॥ ૪૬॥

શઙ્ખચૂડવધોદ્દામો ગોપીરક્ષણતત્પરઃ ।
પાઞ્ચજન્યકરો રામી ત્રિરામી વનજો જયઃ ॥ ૪૭॥

ફાલ્ગુનઃ ફાલ્ગુનસખો વિરાધવધકારકઃ ।
રુક્મિણીપ્રાણનાથશ્ચ સત્યભામાપ્રિયઙ્કરઃ ॥ ૪૮॥

કલ્પવૃક્ષો મહાવૃક્ષઃ દાનવૃક્ષો મહાફલઃ ।
અઙ્કુશો ભૂસુરો ભાવો ભ્રામકો ભામકો હરિઃ ॥ ૪૯॥

સરલઃ શાશ્વતો વીરો યદુવંશી શિવાત્મકઃ ।
પ્રદ્યુમ્નો બલકર્તા ચ પ્રહર્તા દૈત્યહા પ્રભુઃ ॥ ૫૦॥

મહાધની મહાવીરો વનમાલાવિભૂષણઃ ।
તુલસીદામશોભાઢ્યો જાલન્ધરવિનાશનઃ ॥ ૫૧॥

શૂરઃ સૂર્યો મૃતણ્ડશ્ચ ભાસ્કરો વિશ્વપૂજિતઃ ।
રવિસ્તમોહા વહ્નિશ્ચ બાડવો વડવાનલઃ ॥ ૫૨॥

દૈત્યદર્પવિનાશી ચ ગરુડો ગરુડાગ્રજઃ ।

ગોપીનાથો મહાનાથો વૃન્દાનાથોઽવિરોધકઃ ॥ ૫૩॥

પ્રપઞ્ચી પઞ્ચરૂપશ્ચ લતાગુલ્મશ્ચ ગોપતિઃ ।
ગઙ્ગા ચ યમુનારૂપો ગોદા વેત્રવતી તથા ॥ ૫૪॥

કાવેરી નર્મદા તાપ્તી ગણ્ડકી સરયૂસ્તથા ।
રાજસસ્તામસસ્સત્ત્વી સર્વાઙ્ગી સર્વલોચનઃ ॥ ૫૫॥

સુધામયોઽમૃતમયો યોગિનીવલ્લભઃ શિવઃ ।
બુદ્ધો બુદ્ધિમતાં શ્રેષ્ઠો વિષ્ણુર્જિષ્ણુઃ શચીપતિઃ ॥ ૫૬॥

વંશી વંશધરો લોકઃ વિલોકો મોહનાશનઃ ।
રવરાવો રવો રાવો બલો બાલબલાહકઃ ॥ ૫૭॥

શિવો રુદ્રો નલો નીલો લાઙ્ગલી લાઙ્ગલાશ્રયઃ ।
પારદઃ પાવનો હંસો હંસારૂઢો જગત્પતિઃ ॥ ૫૮॥

મોહિનીમોહનો માયી મહામાયો મહામખી ।
વૃષો વૃષાકપિઃ કાલઃ કાલીદમનકારકઃ ॥ ૫૯॥

કુબ્જાભાગ્યપ્રદો વીરઃ રજકક્ષયકારકઃ ।
કોમલો વારુણો રાજા જલજો જલધારકઃ ॥ ૬૦॥

હારકઃ સર્વપાપઘ્નઃ પરમેષ્ઠી પિતામહઃ ।
ખડ્ગધારી કૃપાકારી રાધારમણસુન્દરઃ ॥ ૬૧॥

દ્વાદશારણ્યસમ્ભોગી શેષનાગફણાલયઃ ।
કામઃ શ્યામઃ સુખશ્રીદઃ શ્રીપતિઃ શ્રીનિધિઃ કૃતી ॥ ૬૨॥

હરિર્નારાયણો નારો નરોત્તમ ઇષુપ્રિયઃ ।
ગોપાલીચિત્તહર્તા ચ કર્ત્તા સંસારતારકઃ ॥ ૬૩॥

આદિદેવો મહાદેવો ગૌરીગુરુરનાશ્રયઃ ।
સાધુર્મધુર્વિધુર્ધાતા ત્રાતાઽક્રૂરપરાયણઃ ॥ ૬૪॥

રોલમ્બી ચ હયગ્રીવો વાનરારિર્વનાશ્રયઃ ।
વનં વની વનાધ્યક્ષઃ મહાવન્દ્યો મહામુનિઃ ॥ ૬૫॥

સ્યામન્તકમણિપ્રાજ્ઞો વિજ્ઞો વિઘ્નવિઘાતકઃ ।
ગોવર્દ્ધનો વર્દ્ધનીયઃ વર્દ્ધનો વર્દ્ધનપ્રિયઃ ॥ ૬૬॥

વર્દ્ધન્યો વર્દ્ધનો વર્દ્ધી વાર્દ્ધિષ્ણુઃ સુમુખપ્રિયઃ ।
વર્દ્ધિતો વૃધ્દ્કો વૃધ્દ્ધો વૃન્દારકજનપ્રિયઃ ॥ ૬૭॥

ગોપાલરમણીભર્તા સામ્બકુષ્ઠવિનાશકઃ ।
રુક્મિણીહરણઃ પ્રેમપ્રેમી ચન્દ્રાવલીપતિઃ ॥ ૬૮॥

શ્રીકર્તા વિશ્વભર્તા ચ નરો નારાયણો બલી ।
ગણો ગણપતિશ્ચૈવ દત્તાત્રેયો મહામુનિઃ ॥ ૬૯॥

વ્યાસો નારાયણો દિવ્યો ભવ્યો ભાવુકધારકઃ ।
શ્વઃશ્રેયસં શિવં ભદ્રં ભાવુકં ભાવિકં શુભમ્ ॥ ૭૦॥

શુભાત્મકઃ શુભઃ શાસ્તા પ્રશાસ્તા મેઘાનાદહા ।
બ્રહ્મણ્યદેવો દીનાનામુદ્ધારકરણક્ષમઃ ॥ ૭૧॥

કૃષ્ણઃ કમલપત્રાક્ષઃ કૃષ્ણઃ કમલલોચનઃ ।
કૃષ્ણઃ કામી સદા કૃષ્ણઃ સમસ્તપ્રિયકારકઃ ॥ ૭૨॥

નન્દો નન્દી મહાનન્દી માદી માદનકઃ કિલી ।
મિલી હિલી ગિલી ગોલી ગોલો ગોલાલયો ગુલી ॥ ૭૩॥

ગુગ્ગુલી મારકી શાખી વટઃ પિપ્પલકઃ કૃતી ।
મ્લેચ્છહા કાલહર્ત્તા ચ યશોદાયશ એવ ચ ॥ ૭૪॥

અચ્યુતઃ કેશવો વિષ્ણુઃ હરિઃ સત્યો જનાર્દનઃ ।
હંસો નારાયણો લીલો નીલો ભક્તિપરાયણઃ ॥ ૭૫॥

જાનકીવલ્લભો રામઃ વિરામો વિઘ્નનાશનઃ ।
સહભાનુર્મહાભાનુઃ વીરબાહુર્મહોદધિઃ ॥ ૭૬॥

સમુદ્રોઽબ્ધિરકૂપારઃ પારાવારઃ સરિત્પતિઃ ।
ગોકુલાનન્દકારી ચ પ્રતિજ્ઞાપરિપાલકઃ ॥ ૭૭॥

સદારામઃ કૃપારામઃ મહારામો ધનુર્ધરઃ ।
પર્વતઃ પર્વતાકારો ગયો ગેયો દ્વિજપ્રિયઃ ॥ ૭૮॥

કમ્બલાશ્વતરો રામો રામાયણપ્રવર્તકઃ ।
દ્યૌર્દિવો દિવસો દિવ્યો ભવ્યો ભાવિ ભયાપહઃ ॥ ૭૯॥

પાર્વતીભાગ્યસહિતો ભર્તા લક્ષ્મીવિલાસવાન્ ।
વિલાસી સાહસી સર્વી ગર્વી ગર્વિતલોચનઃ ॥ ૮૦॥

મુરારિર્લોકધર્મજ્ઞઃ જીવનો જીવનાન્તકઃ ।
યમો યમાદિયમનો યામી યામવિધાયકઃ ॥ ૮૧॥

વસુલી પાંસુલી પાંસુઃ પાણ્ડુરર્જુનવલ્લભઃ ।
લલિતા ચન્દ્રિકામાલી માલી માલામ્બુજાશ્રયઃ ॥ ૮૨॥

અમ્બુજાક્ષો મહાયજ્ઞઃ દક્ષઃ ચિન્તામણિઃ પ્રભુઃ ।
મણિર્દિનમણિશ્ચૈવ કેદારો બદરીશ્રયઃ ॥ ૮૩॥

બદરીવનસમ્પ્રીતઃ વ્યાસઃ સત્યવતીસુતઃ ।
અમરારિનિહન્તા ચ સુધાસિન્ધુવિધૂદયઃ ॥ ૮૪॥

ચન્દ્રો રવિઃ શિવઃ શૂલી ચક્રી ચૈવ ગદાધરઃ ।
શ્રીકર્તા શ્રીપતિઃ શ્રીદઃ શ્રીદેવો દેવકીસુતઃ ॥ ૮૫॥

શ્રીપતિઃ પુણ્ડરીકાક્ષઃ પદ્મનાભો જગત્પતિઃ ।
વાસુદેવોઽપ્રમેયાત્મા કેશવો ગરુડધ્વજઃ ॥ ૮૬॥

નારાયણઃ પરં ધામ દેવદેવો મહેશ્વરઃ ।
ચક્રપાણિઃ કલાપૂર્ણો વેદવેદ્યો દયાનિધિઃ ॥ ૮૭॥

ભગવાન્ સર્વભૂતેશો ગોપાલઃ સર્વપાલકઃ ।
અનન્તો નિર્ગુણો નિત્યો નિર્વિકલ્પો નિરઞ્જનઃ ॥ ૮૮॥

નિરાધારો નિરાકારઃ નિરાભાસો નિરાશ્રયઃ ।
પુરુષઃ પ્રણવાતીતો મુકુન્દઃ પરમેશ્વરઃ ॥ ૮૯॥

ક્ષણાવનિઃ સાર્વભૌમો વૈકુણ્ઠો ભક્તવત્સલઃ ।
વિષ્ણુર્દામોદરઃ કૃષ્ણો માધવો મથુરાપતિઃ ॥ ૯૦॥

દેવકીગર્ભસમ્ભૂતો યશોદાવત્સલો હરિઃ ।
શિવઃ સઙ્કર્ષણઃ શમ્ભુર્ભૂતનાથો દિવસ્પતિઃ ॥ ૯૧॥

અવ્યયઃ સર્વધર્મજ્ઞઃ નિર્મલો નિરુપદ્રવઃ ।
નિર્વાણનાયકો નિત્યો નીલજીમૂતસન્નિભઃ ॥ ૯૨॥

કલાક્ષયશ્ચ સર્વજ્ઞઃ કમલારૂપતત્પરઃ ।
હૃષીકેશઃ પીતવાસા વસુદેવપ્રિયાત્મજઃ ॥ ૯૩॥

નન્દગોપકુમારાર્યઃ નવનીતાશનો વિભુઃ ।

પુરાણપુરુષઃ શ્રેષ્ઠઃ શઙ્ખપાણિઃ સુવિક્રમઃ ॥ ૯૪॥

અનિરુદ્ધશ્ચક્રરથઃ શાર્ઙ્ગપાણિશ્ચતુર્ભુજઃ ।
ગદાધરઃ સુરાર્તિઘ્નો ગોવિન્દો નન્દકાયુધઃ ॥ ૯૫॥

વૃન્દાવનચરઃ શૌરિર્વેણુવાદ્યવિશારદઃ ।
તૃણાવર્તાન્તકો ભીમસાહસી બહુવિક્રમઃ ॥ ૯૬॥

શકટાસુરસંહારી બકાસુરવિનાશનઃ ।
ધેનુકાસુરસંહારી પૂતનારિર્નૃકેસરી ॥ ૯૭॥

પિતામહો ગુરુસ્સાક્ષાત્ પ્રત્યગાત્મા સદાશિવઃ ।
અપ્રમેયઃ પ્રભુઃ પ્રાજ્ઞોઽપ્રતર્ક્યઃ સ્વપ્નવર્દ્ધનઃ ॥ ૯૮॥

ધન્યો માન્યો ભવો ભાવો ધીરઃ શાન્તો જગદ્ગુરુઃ ।
અન્તર્યામીશ્વરો દિવ્યો દૈવજ્ઞો દેવસંસ્તુતઃ ॥ ૯૯॥

ક્ષીરાબ્ધિશયનો ધાતા લક્ષ્મીવાંલ્લક્ષ્મણાગ્રજઃ ।
ધાત્રીપતિરમેયાત્મા ચન્દ્રશેખરપૂજિતઃ ॥ ૧૦૦॥

લોકસાક્ષી જગચ્ચક્ષુઃ પુણ્યચારિત્રકીર્તનઃ ।
કોટિમન્મથસૌન્દર્યઃ જગન્મોહનવિગ્રહઃ ॥ ૧૦૧॥

મન્દસ્મિતાનનો ગોપો ગોપિકાપરિવેષ્ટિતઃ ।
ફુલ્લારવિન્દનયનઃ ચાણૂરાન્ધ્રનિષૂદનઃ ॥ ૧૦૨॥

ઇન્દીવરદલશ્યામો બર્હિબર્હાવતંસકઃ ।
મુરલીનિનદાહ્લાદઃ દિવ્યમાલ્યામ્બરાવૃતઃ ॥ ૧૦૩॥

સુકપોલયુગઃ સુભ્રૂયુગલઃ સુલલાટકઃ ।
કમ્બુગ્રીવો વિશાલાક્ષો લક્ષ્મીવાઞ્છુભલક્ષણઃ ॥ ૧૦૪॥

પીનવક્ષાશ્ચતુર્બાહુશ્ચતુર્મૂર્તિસ્ત્રિવિક્રમઃ ।
કલઙ્કરહિતઃ શુદ્ધઃ દુષ્ટશત્રુનિબર્હણઃ ॥ ૧૦૫॥

કિરીટકુણ્ડલધરઃ કટકાઙ્ગદમણ્ડિતઃ ।
મુદ્રિકાભરણોપેતઃ કટિસૂત્રવિરાજિતઃ ॥ ૧૦૬॥

મઞ્જીરરઞ્જિતપદઃ સર્વાભરણભૂષિતઃ ।
વિન્યસ્તપાદયુગલો દિવ્યમઙ્ગલવિગ્રહઃ ॥ ૧૦૭॥

ગોપિકાનયનાનન્દઃ પૂર્ણચન્દ્રનિભાનનઃ ।
સમસ્તજગદાનન્દઃ સુન્દરો લોકનન્દનઃ ॥ ૧૦૮॥

યમુનાતીરસઞ્ચારી રાધામન્મથવૈભવઃ ।
ગોપનારીપ્રિયો દાન્તો ગોપીવસ્ત્રાપહારકઃ ॥ ૧૦૯॥

શૃઙ્ગારમૂર્તિઃ શ્રીધામા તારકો મૂલકારણમ્ ।
સૃષ્ટિસંરક્ષણોપાયઃ ક્રૂરાસુરવિભઞ્જનઃ ॥ ૧૧૦॥

નરકાસુરસંહારી મુરારિરરિમર્દનઃ ।
આદિતેયપ્રિયો દૈત્યભીકરો યદુશેખરઃ ॥ ૧૧૧॥

જરાસન્ધકુલધ્વંસી કંસારાતિઃ સુવિક્રમઃ ।
પુણ્યશ્લોકઃ કીર્તનીયઃ યાદવેન્દ્રો જગન્નુતઃ ॥ ૧૧૨॥

રુક્મિણીરમણઃ સત્યભામાજામ્બવતીપ્રિયઃ ।
મિત્રવિન્દાનાગ્નજિતીલક્ષ્મણાસમુપાસિતઃ ॥ ૧૧૩॥

સુધાકરકુલે જાતોઽનન્તપ્રબલવિક્રમઃ ।
સર્વસૌભાગ્યસમ્પન્નો દ્વારકાપત્તને સ્થિતઃ ॥ ૧૧૪॥

ભદ્રાસૂર્યસુતાનાથો લીલામાનુષવિગ્રહઃ ।
સહસ્રષોડશસ્ત્રીશો ભોગમોક્ષૈકદાયકઃ ॥ ૧૧૫॥

વેદાન્તવેદ્યઃ સંવેદ્યો વૈદ્યો બ્રહ્માણ્ડનાયકઃ ।
ગોવર્દ્ધનધરો નાથઃ સર્વજીવદયાપરઃ ॥ ૧૧૬॥

મૂર્તિમાન્ સર્વભૂતાત્મા આર્તત્રાણપરાયણઃ ।
સર્વજ્ઞઃ સર્વસુલભઃ સર્વશાસ્ત્રવિશારદઃ ॥ ૧૧૭॥

ષડ્ગુણૈશ્વર્યસમ્પન્નઃ પૂર્ણકામો ધુરન્ધરઃ ।
મહાનુભાવઃ કૈવલ્યદાયકો લોકનાયકઃ ॥ ૧૧૮॥

આદિમધ્યાન્તરહિતઃ શુદ્ધસાત્ત્વિકવિગ્રહઃ ।
અસમાનઃ સમસ્તાત્મા શરણાગતવત્સલઃ ॥ ૧૧૯॥

ઉત્પત્તિસ્થિતિસંહારકારણં સર્વકારણમ્ ।
ગમ્ભીરઃ સર્વભાવજ્ઞઃ સચ્ચિદાનન્દવિગ્રહઃ ॥ ૧૨૦॥

વિષ્વક્સેનઃ સત્યસન્ધઃ સત્યવાક્ સત્યવિક્રમઃ ।
સત્યવ્રતઃ સત્યરતઃ સર્વધર્મપરાયણઃ ॥ ૧૨૧॥

આપન્નાર્તિપ્રશમનઃ દ્રૌપદીમાનરક્ષકઃ ।
કન્દર્પજનકઃ પ્રાજ્ઞો જગન્નાટકવૈભવઃ ॥ ૧૨૨॥

ભક્તિવશ્યો ગુણાતીતઃ સર્વૈશ્વર્યપ્રદાયકઃ ।
દમઘોષસુતદ્વેષી બાણબાહુવિખણ્ડનઃ ॥ ૧૨૩॥

ભીષ્મભક્તિપ્રદો દિવ્યઃ કૌરવાન્વયનાશનઃ ।
કૌન્તેયપ્રિયબન્ધુશ્ચ પાર્થસ્યન્દનસારથિઃ ॥ ૧૨૪॥

નારસિંહો મહાવીરઃ સ્તમ્ભજાતો મહાબલઃ ।
પ્રહ્લાદવરદઃ સત્યો દેવપૂજ્યોઽભયઙ્કરઃ ॥ ૧૨૫॥

ઉપેન્દ્ર ઇન્દ્રાવરજો વામનો બલિબન્ધનઃ ।
ગજેન્દ્રવરદઃ સ્વામી સર્વદેવનમસ્કૃતઃ ॥ ૧૨૬॥

શેષપર્યઙ્કશયનઃ વૈનતેયરથો જયી ।
અવ્યાહતબલૈશ્વર્યસમ્પન્નઃ પૂર્ણમાનસઃ ॥ ૧૨૭॥

યોગેશ્વરેશ્વરઃ સાક્ષી ક્ષેત્રજ્ઞો જ્ઞાનદાયકઃ ।
યોગિહૃત્પઙ્કજાવાસો યોગમાયાસમન્વિતઃ ॥ ૧૨૮॥

નાદબિન્દુકલાતીતશ્ચતુર્વર્ગફલપ્રદઃ ।
સુષુમ્નામાર્ગસઞ્ચારી દેહસ્યાન્તરસંસ્થિતઃ ॥ ૧૨૯॥

દેહેન્દ્રિયમનઃપ્રાણસાક્ષી ચેતઃપ્રસાદકઃ ।
સૂક્ષ્મઃ સર્વગતો દેહી જ્ઞાનદર્પણગોચરઃ ॥ ૧૩૦॥

તત્ત્વત્રયાત્મકોઽવ્યક્તઃ કુણ્ડલી સમુપાશ્રિતઃ ।
બ્રહ્મણ્યઃ સર્વધર્મજ્ઞઃ શાન્તો દાન્તો ગતક્લમઃ ॥ ૧૩૧॥

શ્રીનિવાસઃ સદાનન્દઃ વિશ્વમૂર્તિર્મહાપ્રભુઃ ।
સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ॥ ૧૩૨॥

સમસ્તભુવનાધારઃ સમસ્તપ્રાણરક્ષકઃ ।
સમસ્તસર્વભાવજ્ઞો ગોપિકાપ્રાણવલ્લભઃ ॥ ૧૩૩॥

નિત્યોત્સવો નિત્યસૌખ્યો નિત્યશ્રીર્નિત્યમઙ્ગલઃ ।
વ્યૂહાર્ચિતો જગન્નાથઃ શ્રીવૈકુણ્ઠપુરાધિપઃ ॥ ૧૩૪॥

પૂર્ણાનન્દઘનીભૂતઃ ગોપવેષધરો હરિઃ ।

કલાપકુસુમશ્યામઃ કોમલઃ શાન્તવિગ્રહઃ ॥ ૧૩૫॥

ગોપાઙ્ગનાવૃતોઽનન્તો વૃન્દાવનસમાશ્રયઃ ।
વેણુવાદરતઃ શ્રેષ્ઠો દેવાનાં હિતકારકઃ ॥ ૧૩૬॥

બાલક્રીડાસમાસક્તો નવનીતસ્ય તસ્કરઃ ।
ગોપાલકામિનીજારશ્ચૌરજારશિખામણિઃ ॥ ૧૩૭॥

પરઞ્જ્યોતિઃ પરાકાશઃ પરાવાસઃ પરિસ્ફુટઃ ।
અષ્ટાદશાક્ષરો મન્ત્રો વ્યાપકો લોકપાવનઃ ॥ ૧૩૮॥

સપ્તકોટિમહામન્ત્રશેખરો દેવશેખરઃ ।
વિજ્ઞાનજ્ઞાનસન્ધાનસ્તેજોરાશિર્જગત્પતિઃ ॥ ૧૩૯॥

ભક્તલોકપ્રસન્નાત્મા ભક્તમન્દારવિગ્રહઃ ।
ભક્તદારિદ્ર્યદમનો ભક્તાનાં પ્રીતિદાયકઃ ॥ ૧૪૦॥

ભક્તાધીનમનાઃ પૂજ્યઃ ભક્તલોકશિવઙ્કરઃ ।
ભક્તાભીષ્ટપ્રદઃ સર્વભક્તાઘૌઘનિકૃન્તનઃ ॥ ૧૪૧॥

અપારકરુણાસિન્ધુર્ભગવાન્ ભક્તતત્પરઃ ॥ ૧૪૨॥

॥ ઇતિ ગોપાલ સહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

ફલશ્રુતિઃ

(॥ ગોપાલસહસ્રનામ માહાત્મ્યમ્ ॥)
સ્મરણાત્ પાપરાશીનાં ખણ્ડનં મૃત્યુનાશનમ્ ॥ ૧ ॥

વૈષ્ણવાનાં પ્રિયકરં મહારોગનિવારણમ્ ।
બ્રહ્મહત્યાસુરાપાનં પરસ્ત્રીગમનં તથા ॥ ૨ ॥

પરદ્રવ્યાપહરણં પરદ્વેષસમન્વિતમ્ ।
માનસં વાચિકં કાયં યત્પાપં પાપસમ્ભવમ્ ॥ ૩ ॥

સહસ્રનામપઠનાત્ સર્વં નશ્યતિ તત્ક્ષણાત્ ।
મહાદારિદ્ર્યયુક્તો યો વૈષ્ણવો વિષ્ણુભક્તિમાન્ ॥ ૪ ॥

કાર્તિક્યાં સમ્પઠેદ્રાત્રૌ શતમષ્ટોત્તરં ક્રમાત્ ।
પીતામ્બરધરો ધીમાન્ સુગન્ધૈઃ પુષ્પચન્દનૈઃ ॥ ૫ ॥

પુસ્તકં પૂજયિત્વા તુ નૈવેદ્યાદિભિરેવ ચ ।

રાધાધ્યાનાઙ્કિતો ધીરો વનમાલાવિભૂષિતઃ ॥ ૬ ॥

શતમષ્ટોત્તરં દેવિ પઠેન્નામસહસ્રકમ્ ।
ચૈત્રશુક્લે ચ કૃષ્ણે ચ કુહૂસઙ્ક્રાન્તિવાસરે ॥ ૭ ॥

પઠિતવ્યં પ્રયત્નેન ત્રૈલોક્યં મોહયેત્ ક્ષણાત્ ।
તુલસીમાલયા યુક્તો વૈષ્ણવો ભક્તિતત્પરઃ ॥ ૮ ॥

રવિવારે ચ શુક્રે ચ દ્વાદશ્યાં શ્રાદ્ધવાસરે ।
બ્રાહ્મણં પૂજયિત્વા ચ ભોજયિત્વા વિધાનતઃ ॥ ૯ ॥

પઠેન્નામસહસ્રં ચ તતઃ સિદ્ધિઃ પ્રજાયતે ।
મહાનિશાયાં સતતં વૈષ્ણવો યઃ પઠેત્ સદા ॥ ૧૦ ॥

દેશાન્તરગતા લક્ષ્મીઃ સમાયાતિ ન સંશયઃ ।
ત્રૈલોક્યે ચ મહાદેવિ સુન્દર્યઃ કામમોહિતાઃ ॥ ૧૧ ॥

મુગ્ધાઃ સ્વયં સમાયાન્તિ વૈષ્ણવં ચ ભજન્તિ તાઃ ।
રોગી રોગાત્ પ્રમુચ્યેત બદ્ધો મુચ્યેત બન્ધનાત્ ॥ ૧૨ ॥

ગુર્વિણી જનયેત્પુત્રં કન્યા વિન્દતિ સત્પતિમ્ । var ગર્ભિણી
રાજાનો વશ્યતાં યાન્તિ કિં પુનઃ ક્ષુદ્રમાનવાઃ ॥ ૧૩ ॥

સહસ્રનામશ્રવણાત્ પઠનાત્ પૂજનાત્ પ્રિયે ।
ધારણાત્ સર્વમાપ્નોતિ વૈષ્ણવો નાત્ર સંશયઃ ॥ ૧૪ ॥

વંશીવટે ચાન્યવટે તથા પિપ્પલકેઽથ વા ।
કદમ્બપાદપતલે ગોપાલમૂર્તિસંનિધૌ ॥ ૧૫ ॥

યઃ પઠેદ્વૈષ્ણવો નિત્યં સ યાતિ હરિમન્દિરમ્ ।
કૃષ્ણેનોક્તં રાધિકાયૈ મયા પ્રોક્તં તથા શિવે ॥ ૧૬ ॥

નારદાય મયા પ્રોક્તં નારદેન પ્રકાશિતમ્ ।
મયા તુભ્યં વરારોહે પ્રોક્તમેતત્સુદુર્લભમ્ ॥ ૧૭ ॥

ગોપનીયં પ્રયત્નેન ન પ્રકાશ્યં કથંચન ।
શઠાય પાપિને ચૈવ લમ્પટાય વિશેષતઃ ॥ ૧૮ ॥

ન દાતવ્યં ન દાતવ્યં ન દાતવ્યં કદાચન ।
દેયં શિષ્યાય શાન્તાય વિષ્ણુભક્તિરતાય ચ ॥ ૧૯ ॥

ગોદાનબ્રહ્મયજ્ઞાદેર્વાજપેયશતસ્ય ચ ।
અશ્વમેધસહસ્રસ્ય ફલં પાઠે ભવેત્ ધ્રુવમ્ ॥ ૨૦॥

મોહનં સ્તમ્ભનં ચૈવ મારણોચ્ચાટનાદિકમ્ ।
યદ્યદ્વાઞ્છતિ ચિત્તેન તત્તત્પ્રાપ્નોતિ વૈષ્ણવઃ ॥ ૨૧॥

એકાદશ્યાં નરઃ સ્નાત્વા સુગન્ધિદ્રવ્યતૈલકૈઃ ।
આહારં બ્રાહ્મણે દત્ત્વા દક્ષિણાં સ્વર્ણભૂષણમ્ ॥ ૨૨॥

તત આરમ્ભકર્તાસ્ય સર્વં પ્રાપ્નોતિ માનવઃ ।
શતાવૃત્તં સહસ્રં ચ યઃ પઠેદ્વૈષ્ણવો જનઃ ॥ ૨૩॥

શ્રીવૃન્દાવનચન્દ્રસ્ય પ્રસાદાત્સર્વમાપ્નુયાત્ ।
યદ્ગૃહે પુસ્તકં દેવિ પૂજિતં ચૈવ તિષ્ઠતિ ॥ ૨૪॥

ન મારી ન ચ દુર્ભિક્ષં નોપસર્ગભયં ક્વચિત્ ।
સર્પાદ્યા ભૂતયક્ષાદ્યા નશ્યન્તે નાત્ર સંશયઃ ॥ ૨૫॥

શ્રીગોપાલો મહાદેવિ વસેત્તસ્ય ગૃહે સદા ।
ગૃહે યત્ર સહસ્રં ચ નામ્નાં તિષ્ઠતિ પૂજિતમ્ ॥ ૨૬॥

॥ ૐ તત્સદિતિ શ્રીસમ્મોહનતન્ત્રે પાર્વતીશ્વરસંવાદે
ગોપાલસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

શ્રીરાધારમણઃ કૃષ્ણઃ ગુણરત્નૈસ્સુગુમ્ફિતામ્ ।
સ્વીકૃત્યેમાં મિતાં માલાં સ નો વિષ્ણુઃ પ્રસીદતુ ॥

---

Addendum for prayers

શ્રી ગોપાલસહસ્રનામ શાપવિમોચનમહામન્ત્રમ્

ૐ અસ્ય શ્રીગોપાલસહસ્રનામ શાપવિમોચનમહામન્ત્રસ્ય વામદેવઋષિઃ ।
શ્રીગોપાલો દેવતા પઙ્ક્તિઃ છન્દઃ ।
શ્રી સદાશિવવાક્ય શાપવિમોચનાર્થં જપે વિનિયોગઃ ।
ઋષ્યાદિન્યાસઃ
વામદેવ ઋષયે નમઃ શિરસિ ।
ગોપાલ દેવતાયૈ નમઃ હૃદયે ।
પઙ્ક્તિ છન્દસે નમઃ મુખે ।

સદાશિવવાક્ય શાપવિમુક્ત્યર્થં નમઃ સર્વાઙ્ગે ॥

અથ કરાદિન્યાસઃ

ૐ ઐં અઙ્ગુષ્ઠાભ્યાં નમઃ ॥

ૐ ક્લીં તર્જનીભ્યાં નમઃ ॥

ૐ હ્રીં મધ્યમાભ્યાં નમઃ ॥

ૐ શ્રીં અનામિકાભ્યાં નમઃ ॥

ૐ વામદેવાય કનિષ્ઠિકાભ્યાં નમઃ ॥

ૐ નમઃ સ્વાહા કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અથ હૃદયાદિન્યાસઃ

ૐ ઐં હૃદયાય નમઃ ॥

ૐ ક્લીં શિરસિ સ્વાહા ॥

ૐ હ્રીં શિખાયૈ વષટ્ ॥

ૐ શ્રીં કવચાય હુમ્ ॥

ૐ વામદેવાય નેત્રત્રયાય વૌષટ્ ॥

ૐ નમઃ સ્વાહા અસ્ત્રાય ફટ્ ॥

અથ ધ્યાનમ્

ૐ ધ્યાયેદ્દેવં ગુણાતીતં પીતકૌશેયવાસસમ્ ।
પ્રસન્નં ચારુવદનં ચ નિર્ગુણં શ્રીપતિં પ્રભુમ્ ॥

મન્ત્રઃ

ૐ ઐં ક્લીં હ્રીં શ્રીં વામદેવાય નમઃ (સ્વાહા)।

There are many words pAThabhedas/alternatives in print. Please check the scanned booklet linked in the html file.

Proofread by PSA Easwaran

*Shri GopAla SahasranAma Stotra*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*